श्री दत्तात्रेय कवचं

श्री दत्तात्रेय कवचं

श्रीपादः पातु मे पादावूरू सिद्धासनस्थितः |
पायाद्दिगंबरो गुह्यं नृहरिः पातु मे कटिं ||1||

नाभिं पातु जगत्स्रष्टोदरं पातु दलोदरः |
कृपालुः पातु हृदयं षड्भुजः पातु मे भुजौ ||2||

स्रक्कुंडीशूलडमरुशंखचक्रधरः करान् |
पातु कंठं कंबुकंठः सुमुखः पातु मे मुखं ||3||

जिह्वां मे वेदवाक्पातु नेत्रे मे पातु दिव्यदृक् |
नासिकां पातु गंधात्मा पातु पुण्यश्रवाः श्रुती ||4||

ललाटं पातु हंसात्मा शिरः पातु जटाधरः |
कर्मेंद्रियाणि पात्वीशः पातु ज्ञानेंद्रियाण्यजः ||5||

सर्वांतरोऽन्तकरणं प्राणान्मे पातु योगिराट् |
उपरिष्टादधस्ताच्च पृष्ठतः पार्श्वतोऽग्रजः ||6||

अंतर्बहिश्च मां नित्यं नानारूपधरोऽवतु |
वर्जितं कवचेनाव्यात्स्थानं मे दिव्यदर्शनः ||7||

राजतः शत्रुतो हिंस्राद् दुष्प्रयोगादितोऽघतः |
आधिव्याधिभयार्तिभ्यो दत्तात्रेयः सदावतु ||8||

धनधान्यगृहक्षेत्रस्त्रीपुत्रपशुकिंकरान् |
ज्ञातींश्च पातु नित्यं मेऽनसूयानंदवर्धनः ||9||

बालोन्मत्तपिशाचाभो द्युनिट्संधिषु पातु मां |
भूतभौतिकमृत्युभ्यो हरिः पातु दिगंबरः ||10||

य एतद्दत्तकवचं सन्नह्याद्भक्तिभावितः |
सर्वानर्थविनिर्मुक्तो ग्रहपीडाविवर्जितः ||11||

भूतप्रेतपिशाचाद्यैर्देवैरप्यपराजितः |
भुक्त्वात्र दिव्यभोगान्स देहांते तत्पदं व्रजेत् ||12||

इति श्रीमद् परमपूजनीय श्रीवासुदेवानंदसरस्वतीविरचितं
श्रीदत्तात्रेयकवचं संपूर्णं |